# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा – तत्त्वाचार्यः (SEM-1) | प्रश्नपत्रम् – १ | गुणाः – ७० |
|---|---|---|
| विषयः – अनिवार्यसंस्कृतम् | ग्रन्थः भारतीयसंशोधनपद्धतिः पाठसमीक्षाविज्ञानञ्च | |
| दिनाङ्कः – ०४/१२/२०१८ | | समयः –१०.०० तः ०१.०० |

**प्रथमान्वितिः**

**प्रश्नः –१** *पाठसमीक्षायाः के के बिन्दवः सन्ति? इति उल्लिख्य कस्यचिदेकस्य पाठस्य समीक्षा कार्या।* ०५

**अथवा**

*शोधप्रक्रिया यथा संस्कृते चलति, सा समीचीना असमीचीना वा, विषयेऽस्मिन् स्वकीयम् अभिप्रायं लिखत।*

**प्रश्नः –२** *अनुसन्धानस्य स्वरूपं कथं भवेत्? इति कस्यापि विषयस्य अध्यायविभाजनपूर्वकं प्रस्तोतव्यम् ।* १०

**अथवा**

*अनुसन्धानस्य उद्देश्यं विशेषरूपेण संस्कृतक्षेत्रे कथं भवेत् संस्कृतस्य विकासाय इति स्वशब्दैः विवेचनीयम्।*

**द्वितीयान्वितिः**

**प्रश्नः –३** **निम्नलिखितयोरेकस्योपरि टिप्पणी लेख्या-** ०५

*१ प्रगति-प्रतिवेदनम्*

*२ शोधसमस्या*

**प्रश्नः –४** *भवतां मतानुसारं संस्कृतक्षेत्रे काः काः शोधसमस्याः सन्ति, इति एकं विषयमाश्रित्य स्पष्टीकुर्वन्तु।* १०

**अथवा**

*शोधात्पूर्वं कथं समस्यायाः चयनं कर्त्तव्यम् इति सोदाहरणं स्पष्टयतु।*

**तृतीयान्वितिः**

**प्रश्नः –५** **कस्यापि एकस्य समीक्षा कार्या-** ०५

*१ रामायणस्य*

*२ पञ्चतन्त्रस्य*

**प्रश्नः –६** *के के शोधप्रकाराः सन्ति इति सोदाहरणं स्पष्टीक्रियताम्।* १०

**(अथवा )**

*शोधविषयस्य चयनात् पूर्वं के के बिन्दवः विचारणीयाः इति सोदाहरणं स्पष्टयन्तु।*

## चतुर्थान्वितिः

**प्रश्नः -७ निम्नलिखितयोरेकस्योपरि टिप्पणी लेख्या - ०५**

१ *पाठसंशोधनपद्धतिः*

२ *सामग्री-संकलनम्*

**प्रश्नः -८** *समीक्षा -शब्दस्य अर्थं विलिख्य केषाञ्चित् पञ्चपाठानां समीक्षा कार्या।* **१०**

**(अथवा )**

*समीक्षात्मकम् अध्ययनम् आधारीकृत्य कस्यापि एकस्य शोधप्राग्रूपस्य निर्माणं कर्तव्यम्।*

**प्रश्नः -९ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानां लघूत्तरं लेख्यम् - १०**

१ *अनुसन्धान-शब्दे कः प्रत्ययः?*

२ *अनुसन्धान-शब्दे को धातुः?*

३ *शोधसमस्यायाः विषये कदा विचारः कर्तव्यः?*

४ *प्रगति-प्रतिवेदनं कदा प्रस्तूयते?*

५ *समीक्षा-शब्दे को धातुः?*

६ *समीक्षा-शब्दे कः प्रत्ययः?*

७ *समीक्षा-शब्दस्य कस्मिन् लिङ्गे प्रयोगो भवति?*

८ *ज्ञानस्य विकासः शोधस्य उद्देश्यं विदयते वा न विद्यते?*

९ *नूतनवस्तूपलब्धिः शोधस्य उद्देश्यं विद्यते वा न विद्यते?*

१० *अनुसन्धानं वर्णनात्मकं भवति वा न भवति ?*

११ *अवलोकनात्मकः शोधो भवति वा न भवति ?*

१२ *शोधस्य भाषा निश्चयात्मिका भवेत् वा न भवेत् ?*

१३ *शोधस्य शोधो भवितुं शक्नोति वा न शक्नोति ?*

१४ *संस्कृतक्षेत्रे विशेषरूपेण कीदृशम् अनुसन्धानं भवति?*

१५ *विज्ञानक्षेत्रे विशेषरूपेण कीदृशम् अनुसन्धानं भवति?*

--००--